खण्डन्तु मधुरं वृष्यं चक्षुष्यं बृंहणं हिमम्। वातपित्तहरं स्निग्धं बल्यं वातहरं परम्। (चिनि) सितायाः लक्षणं गुणाश्च खण्डन्तु सिकताकृपं सुश्वेतं शर्करा सिता। सिता सुमधुरा रुच्या वातपित्तास्रदाहहृत्। मूर्च्छाच्छर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी। अथ "(मिचरि) सितोपलगुणाः भवेत् पुष्पसिता शीता रक्तपित्तहरी मता। सितोपलनिभा लघ्वी वातपित्तहरा हिमा। शर्करा छर्द्यतीसारतृड्दाहरक्तपित्तनुत्। यथा यथैव नैर्मल्यं मधुरत्वं तथा तथा। स्नेहगौरवशैत्यानि सरत्वं च तथा तथा" इति भावप्र० इक्षुवर्गः। एतत्प्रसङ्गात् सुश्रुते खण्डादिजातद्रव्याणामन्यद्रव्यजातशर्कराणाञ्च गुणा उक्ता यथा। "यो यो मत्स्यण्डिकाखण्डशर्कराणां स्वको गुणः। तेन तेनैव निर्दिश्यास्तेषां विस्रावणो गुणाः। सारस्थिता सुविमला निःक्षारा च यथा-यथा। तथा तथा गुणवती विज्ञेया शर्करा बुधैः। मधुशर्करा पुनश्छर्द्यतीसारहरी रूक्षा छेदनी प्रह्लादनी कषाययमधुरा मधुरविपाका च। यवासशर्करा मधुरकषाया तिक्तानुरसा श्लेष्महरी सरा चेति। यावत्यः शर्कराः प्रोक्ताः सर्वा दाहप्रणाशनाः। रक्तपित्तप्रशमनाश्छर्दिमूर्च्छातृषापहाः। रूक्षं मधूकपुष्पोत्थं फाणितं वातपित्तकृत्। कफघ्नं मधुरं पाके कषायं वस्तिदूषणम्" "मन्दाक्रान्ता वितरति रसं नेक्षुयष्टिः कदाऽपि छन्दो०। श्रीफलञ्चेक्षुदण्डश्च विप्राणां तु बलिर्मतः" कालिकापु० "कुष्माण्डमिक्षुदण्डांश्च" देवी पु० इक्षोर्विकारः अण्। ऐक्षव गुडादौ त्रि०। "ऐक्षवं गुडवर्जितम्" स्मृतिः। इक्षूणां भवनं क्षेत्रं शाकटच् शाकनच् च वा तद्भवने क्षेत्रे। इक्षूणां छाया। इक्षुच्छायम् न० "इक्षुच्छायानिषादिन्य" रघुः अत्र छानिषादिन्य इतिच्छेदः सि०कौ० इक्षूणां वनम्। अवनस्पतित्वात् निलं णत्वम् इक्षुवणम्। २कोफिलाक्षे च राजनि०। ३इक्षच्छायाम् [इक्षुभेदे स्वार्थे कन्। २इक्षुवृक्षे

**इक्षुक** पु० इक्षुप्रकारः स्थूला० कन्। १इक्षुतुल्यस्वादे (नडा)

**इक्षुकाण्ड** पु० इक्षोः काण्डइव काण्डोऽस्य। १काशवृक्षे २मुञ्जतृणे (मुज) इक्षुः काण्डइव २इक्षुदण्डे च। "ऋिप्र पुरो न जटहे मङ्करिक्षुकाण्डम्" माघः।

**इक्षुकीय** त्रि० इक्षवः सन्त्यस्मिन् छ नडा० कुक् च। इक्षुयुक्ते देशे तत्र भवः अण् बिल्व०छस्य लुक्। ऐक्षुकसत्व भवे त्रि० स्त्रियां ङीप्।

**इक्षुकुट्टक** पु० इक्षून् कुट्टयति कुट्ट—शिल्पिनि कन् ईत०। इक्षुच्छेदके गुड़कारके कृषीवलभेदे। [२काशतृणे स्त्री भावप्र०

**इक्षुगन्ध** पु० इक्षोरिव गन्ध एकदेशावयवो यस्य। १क्षुद्रगोक्षुरे

**इक्षुगन्धा** स्त्री इक्षोर्गन्ध इव गन्धोऽस्याः। शुक्लविदार्य्याम्,

**इक्षुज** त्रि०इक्षोस्तद्रसाज्जायते जन—ड ५त०। इक्षुविकारे गुड़ादौ "फाणितञ्चैव मत्स्यण्डी गुड़ः खण्डकमेव च। सिता सितोपलाश्चैते षड्भेदा इक्षुजामताः। इक्षुशब्दे दृष्टे तद्गुणादिकमुक्तम्। [विशेषे २काशतृणे च।

**इक्षुतुल्या** स्त्री इक्षुणा तुल्या पत्रादिना। (जनार) १धान्य-

**इक्षुदण्ड** पु०इक्षुर्दण्ड इव दण्डकारे दीर्घत्वो इक्षुयष्टिरप्यत्र स्त्री

**इक्षुदर्भा** स्त्री इक्षोरिव दर्भोवन्धोऽस्याः। तृणपत्रिकायाम् राजनि०। [इक्षुरसतुल्यजलवाहिनि नदीभेदे।

**इक्षुदा** स्त्री इक्षुमिक्षुरसास्वादं ददाति जलेन दा—क।

**इक्षुनेत्र** न०इक्षुर्नीयते पुनरुत्पादनायारोप्यतेऽनेन नी-ष्ट्रन् इक्षोर्नेत्रमिव वा। इक्षुनेत्राकारे तद्ग्रन्थौ।

**इक्षुपत्र** पु० इक्षोः पत्रमिव पत्रमस्य। (जनार) धान्यभेदे।

**इक्षुपाक** पु० इक्षोः पाकः पच्यमानोरसादिः। गुड़ादौ

**इक्षुप्र** पु०इक्षुरिव पूर्य्यते पृ—कर्मणि घञर्थेक ह्रस्वपक्षे नोत्। शरवृक्षे रत्नमा०।

**इक्षुबालिका** स्त्री इक्षोर्बालः केशइव बालः शीर्षस्थपत्रादिरस्याः। इक्षुतुल्यशीर्षे काशतृणे राजनि०।

**इक्षुभक्षिती** स्त्री इक्षुर्भक्षितो यया जातिवाचकपूर्व्वपदनिष्ठान्तत्वात् ङीप् परनि०। इक्षुभक्षणकर्त्र्यां स्त्रियाम्

**इक्षुमती** स्त्री इक्षुः इक्षुरसोऽस्त्यस्याम् नद्यां मतुप् ङीप्। नदीभेदे "सीता चेक्षुमती वेन्ना देविका च महानदी" भा० आ०८अ० [६त०। इक्षुमूले २तद्ग्रन्थौ न०।

**इक्षुमूल** पु०इक्षोर्मूलं ग्रन्थिरिव मूलं ग्रन्थिर्यस्य। १वंशवृक्षे।

**इक्षुमेह** पु० इक्षुरसतुल्योमेहः। सुश्रुतोक्ते प्रमेहभेदे तद्भेदा विंशतिर्निदानसहितास्तत्रोक्ता यथा "दिवास्वप्नव्यायामालस्यप्रसक्तं शीतस्निग्धमधुरमद्यद्रवान्नपानसेविनं पुरुषं जानीयात्प्रमेही भविष्यतीति। तस्य चैवं प्रवृत्तस्यापरिपक्वा एव वातपित्तश्लेष्माणो यदा मेदसा सहैकत्वमुपेत्य मूत्रवाहिस्रोतांस्यनुसृत्याधो गत्वा वस्तेर्मुखमाश्रित्य निर्भिद्यन्ते तदा प्रमेहान् जनयन्ति। तेषान्तु पूर्व्वरूपाणि हस्तपादतलदाहः स्निग्धपिच्छिलगुरुता गात्राणां मधुरशुक्लमूत्रता तन्द्रा सादः पिपासा दुर्गन्धश्च श्वासस्तालुगलजिह्वादन्तेषु मलोत्पत्तिर्जटिलीभावः केशानां वृद्धिश्च नखानाम्। तत्राविलप्रभूतमूत्रलक्षणाः सर्व्व एव सर्व्वे